# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| कक्षा- आचार्यः – २ | प्रश्नपत्रम् – ०२ | गुणाः – ७० |
| विषयः – साहित्यम् | सत्रम्- ०४ (New) | समयः - ११:३० तः २:३० |
| दिनाङ्कः –२७/०३/२०२० | सन्दर्भग्रन्थः – काव्यालङ्कारसूत्रवृत्तिः (३,४,५) | |

---

### प्रथमान्वितिः (Unit 1)

गुणाः

**प्रश्नः १ निम्नलिखिताभ्याम् एकं सूत्रं ससन्दर्भं स्पष्टयत।** ०५

१ गाढबन्धत्वमोजः।

२ अर्थदृष्टिः समाधिः

**प्रश्नः २ गुणालङ्काराणां भेदं दर्शयित्वा शब्दगुणनिरूपणं कुरुत।** १०

अथवा

**अर्थगुणनिरूपणं सविस्तरम् 'घटना श्लेषः' इति सोदाहरणं स्पष्टयत।**

### द्वितीयान्वितिः (Unit 2)

**प्रश्नः ३ एकं सूत्रं ससन्दर्भं स्पष्टयत।** ०५

१ अनुल्बणो वर्णाऽनुप्रासः श्रेयान्।

२ अनुक्तौ समासोक्तिः।

**प्रश्नः ४ अपह्नुति-अलङ्कारं सविस्तरं वर्णयत।** १०

अथवा

**सन्देहालङ्कारम् उदाहरणेन सह विवेचयत।**

### तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ एकं सूत्रं ससन्दर्भं स्पष्टयत।** ०५

१ न पादान्तलघोर्गुरुत्वं न सर्वत्र।

२ क्षीयत इति कर्मकर्तरि।

**प्रश्नः ६ निम्नलिखितेभ्यः सूत्रेभ्यः द्वयोः सूत्रयोः टिप्पणी कार्या।** १०

१ नैकशब्दः सुप्सुपेति समासात्।

२ त्रिवलीशब्दः सिद्धः संज्ञा चेत्।

३ पत्रपीतिमादिषु गुणवचनेन।

४ हानिवदाधिक्यमप्यङ्गानां विकारः

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ एकं सूत्रं ससन्दर्भं स्पष्टयत।** ०५

१ अविधौ गुरोः स्त्रियां बहुलं विवक्षा।

२ सुदत्यादयः प्रतिविधेयाः।

**प्रश्नः ८ निम्नलिखितेभ्यः द्वयोः सूत्रयोः टिप्पणी कार्या।** १०

१ अवैहीति वृद्धिरवद्या।

२ मित्रेणर्गाप्त्रेति पुंवद्भावात्।

३ कामयानशब्दः सिद्धोऽनादिश्चेत्।

४ दृढभक्तिरसौ सर्वत्र।

**प्रश्नः ९ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशप्रश्नानां लघूत्तरं देयम्।** १०

१ काव्यालङ्कारसूत्रस्य तृतीयाधिकरणस्य किं नाम?

२ चतुर्थाधिकरणस्य प्रथमेऽध्याये कति सूत्राणि सन्ति?

३ 'सौकुमार्य' अर्थगुणस्य लक्षणं लिखत।

४ कस्मिन् अधिकरणे काव्यसमयः शब्दशुद्धिः च वर्तते?

५ खल्वादयः कुत्र न प्रयोज्यौ?

६ 'दीप्तरससत्त्वम्' कस्य गुणस्य लक्षणम्?

७ 'ते-मे' शब्दौ कुत्र प्रयोज्याः?

८ इदं कर्णोत्पलं चक्षुरिदं वेति विलसिनि।
न निश्चिनोति हृदयं किन्तु दोलायते मनः ॥ इत्यत्र कोऽलङ्कारः?

९ गाढबन्धत्वम् कस्य लक्षणम्?

१० आक्षेपालङ्कारस्य लक्षणं किम्?

११ किं नाम व्याजोक्तिः?

१२ तुल्ययोगिता अलङ्कारः कदा भवति?

१३ के शब्दार्थधर्मे काव्यशोभां कुर्वन्ति?

१४ ओजादिगुणाः नित्याः वा अनित्याः?

१५ काव्यलङ्कारसूत्रवृत्त्याः पञ्चमाधिकरणे कति अध्यायाः सन्ति?

*************************